# Heramba Stuti Naranarayanakrita

# નરનારાયણકૃતા હેરમ્બસ્તુતિઃ

## Document Information

Text title : Heramba Stuti Naranarayanakrita

File name : herambastutiHnaranArAyaNakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 13 | 3.13. 11-24||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# નરનારાયણકૃતા હેરમ્બસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।

નમસ્તે ગણનાથાય ભક્તસંરક્ષકાય તે ।

ભક્તેભ્યો ભક્તિદાત્રે વૈ હેરમ્બાય નમો નમઃ ॥ ૧૧॥

અનાથાનાં વિશેષેણ નાથાય ગજવક્ત્રિણે ।

ચતુર્બાહુધરાયૈવ લમ્બોદર નમોઽસ્તુ તે ॥ ૧૨॥

ઢુણ્ઢયે સર્વસારાય નાનાભેદપ્રચારિણે ।

ભેદહીનાય દેવાય નમશ્ચિન્તામણે નમઃ ॥ ૧૩॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિસ્વરૂપિણે ।

યોગાય યોગનાથાય શૂર્પકર્ણાય તે નમઃ ॥ ૧૪॥

સગુણાય નમસ્તુભ્યં નિર્ગુણાય પરાત્મને ।

સર્વપૂજ્યાય સર્વાય દેવદેવાય તે નમઃ ॥ ૧૫॥

બ્રહ્મણાં બ્રહ્મણે તુભ્યં સદા શાન્તિપ્રદાયક ।

સુખશાન્તિધરાયૈવ નાભિશેષાય તે નમઃ ॥ ૧૬॥

પૂર્ણાય પૂર્ણનાથાય પૂર્ણાનન્દાય તે નમઃ ।

યોગમાયાપ્રચાલાય ખેલકાય નમો નમઃ ॥ ૧૭॥

અનાદયે નમસ્તુભ્યમાદિમધ્યાન્તમૂર્તયે ।

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે સિંહવાહાય તે નમઃ ॥ ૧૮॥

ગતાભિમાનિનાં નાથસ્ત્વમેવાત્ર ન સંશયઃ ।

તેન હેરમ્બનામાઽસિ વિનાયક નમોઽસ્તુ તે ॥ ૧૯॥

કિં સ્તુવસ્ત્વાં ગણાધીશ યોગાભેદમયં પરમ્ ।

અતસ્ત્વાં પ્રણમાવો વૈ તેન તુષ્ટો ભવ પ્રભો ॥ ૨૦॥

એવમુક્ત્વા નતૌ તત્ર નરનારાયણાવૃષી ।

તાવુત્થાપ્ય ગણેશાન ઉવાચ ઘનનિસ્વનઃ ॥ ૨૧॥

(ફલશ્રુતિઃ)

હેરમ્બ ઉવાચ ।
વરં ચિત્તેપ્સિતં દાસ્યામિ બ્રૂતં ભક્તિયન્ત્રિતઃ ।
મહાભાગાવાદિમુની યોગમાર્ગપ્રકાશકૌ ॥ ૨૨॥
ભવત્કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં ભવેત્ ।
પઠતે શ઼ૃણ્વતે ચૈવ ભુક્તિમુક્તિપ્રદં તથા ॥ ૨૩॥
યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
મમ ભક્તિપ્રદં ચૈવ ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૨૪॥

ઇતિ નરનારાયણકૃતા હેરમ્બસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૧૩ । ૩.૧૩। ૧૧-૨૪॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 13 . 3.13. 11-24..

Proofread by Yash Khasbage, Preeti Bhandare

*Heramba Stuti Naranarayanakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*